# Garbha Rakshana Stotram

# ગર્ભરક્ષણસ્તોત્રમ્

## Document Information

Text title : garbha rakshA stotram

File name : garbharakshAstotra.itx

Category : raksha, misc, stotra

Location : doc_z_misc_misc

Transliterated by : Sunder Hattangadi, shubhasuman

Proofread by : Sunder Hattangadi, PSA Easwaran

Latest update : February 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# Garbha Rakshana Stotram

## ગર્ભરક્ષણસ્તોત્રમ્

એહ્યેહિ ભગવન્ બ્રહ્મન્ પ્રજાકર્તઃ પ્રજાપતે ।
પ્રગૃહ્ણીષ્વ બલિં ચૈમં  સાપત્યં રક્ષ ગર્ભિણીમ્ ॥ ૧॥

અશ્વિનૌ દેવદેવેશૌ પ્રગૃહ્ણીધન્ બલિં ત્વિમમ્ ।
સાપત્યં ગર્ભિણીં ચૈમં ચ રક્ષતાં પૂજયાનયા ॥ ૨॥

રુદ્રેશા એકાદશ પ્રોક્તાઃ પ્રગૃહ્ણન્તુ બલિં ત્વિમમ્ ।
યક્ષાગમપ્રીતયે વૃત્તં નિત્યં રક્ષન્તુ ગર્ભિણીમ્ ॥ ૩॥

આદિત્યા દ્વાદશ પ્રોક્તાઃ પ્રગૃહ્ણીધ્વં બલિં ત્વિમામ્ ।
અસ્માકં તેજસાં વૃદ્ધ્યૈ નિત્યં રક્ષતુ ગર્ભિણીમ્ ॥ ૪॥

વિનાયક ગણાધ્યક્ષ શિવપુત્ર મહાબલ ।
પ્રગૃહ્ણીષ્વ બલિં ચૈમં સાપત્યં રક્ષ ગર્ભિણીમ્ ॥ ૫ ॥

સ્કન્દ ષણ્મુખ દેવેશ પુત્રપ્રીતિવિવર્ધન ।
પ્રગૃહ્ણીષ્વ બલિં ચૈમં સાપત્યં રક્ષ ગર્ભિણીમ્ ॥ ૬॥

પ્રભાસઃ પ્રભવશ્યામઃ પ્રત્યાસૌ મારુતોઽનલઃ ।
ધ્રુવાધર ધરાશ્ચૈવ વસવેષ્ટૌ પ્રકીર્તિતઃ ।
પ્રગૃહ્ણીષ્વ બલિં ચૈમં નિત્યં રક્ષતુ ગર્ભિણીમ્ ॥ ૭॥

પિતૃદેવિ પિતૃશ્રેષ્ઠે બહુપુત્રિ મહાબલે ।
બુધશ્રેષ્ઠે નિશાવાસે નિવૃત્તે શૌનકપ્રિયે ।
પ્રગૃહ્ણીષ્વ બલિં ચૈમં સાપત્યં રક્ષ ગર્ભિણીમ્ ॥ ૮॥

રક્ષ રક્ષ મહાદેવ ભક્તાનુગ્રહકારક ।
પક્ષિવાહન ગોવિન્દ સાપત્યં રક્ષ ગર્ભિણીમ્ ॥ ૯॥

ઇતિ ગર્ભરક્ષણસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Sunder Hattangadi

Proofread bu Sunder Hattangadi, PSA Easwaran

*Garbha Rakshana Stotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*